www.vidyarthiplus.com

Roll No. ...............................

Total No. of Questions : 19]

[Total No. of Printed Pages : 8

SI. No. : 4278911

# D – 106 (S)

## हाईस्कूल, परीक्षा 2018
## संस्कृत सामान्यम्
## SANSKRIT GENERAL

Time : 3 Hours]

[Maximum Marks : 100

*निर्देश :*

*i) सर्वे प्रश्नाः अनिवार्याः सन्ति।*

*ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।*

**1.** उचित विकल्पं चित्वा लिखत : [1×5=5]

क) "महौषधिः" इत्यस्य पदस्य सन्धिविच्छेदः अस्ति

i) महो + ओषधिः
ii) महा + औषधिः
iii) महे + औषधिः
iv) महे + ओषधिः

ख) 'देवेन्द्रः' इत्यस्मिन् पदे सन्धिः अस्ति

i) यण्
ii) वृद्धिः
iii) अयादिः
iv) गुणस्वरसन्धिः

ग) 'व्यञ्जनसन्धेः' उदाहरणम् अस्ति

i) शिवालयः
ii) देवालयः
iii) सदाचारः
iv) सदैव

घ) 'अति + आचारः' इत्यस्य सन्धिः अस्ति

i) अतिआचारः
ii) अत्यचारः
iii) अत्याचारः
iv) अतीचारः

ङ) अधोलिखितेषु अव्ययं नास्ति

i) यदा
ii) कदा
iii) पता
iv) तदा



2018-3-8 19:52

www.vidyarthiplus.com

**2.** उचित विकल्पं चित्वा लिखत : [1×5=5]

क) 'महापुरुषः' इत्यस्मिन् पदे समासः अस्ति
i) द्विगुः
ii) कर्मधारयः
iii) द्वन्द्वः
iv) तत्पुरुषः

ख) बहुव्रीहिः समासस्य उदाहरणम् अस्ति
i) उपकृष्णं
ii) चन्द्रशेखरः
iii) पञ्चवटी
iv) हरिहरौ

ग) 'बाणहतः' इत्यस्मिन् पदे समास विग्रहः अस्ति
i) बाणं हतः
ii) बाणेन हतः
iii) बाणात् हतः
iv) बाणे हतः

घ) 'अधिकारः' इत्यस्मिन् पदे उपसर्गः अस्ति
i) अध
ii) अधिक
iii) अ
iv) अधि

ङ) अधोलिखितेषु उपसर्गः अस्ति
i) सम्
ii) वद्
iii) अस्
iv) वस्

**3.** उचित विकल्पं चित्वा लिखत : [1×5=5]

क) 'द्रक्ष्यामि' इत्यस्मिन् पदे लकारः अस्ति
i) लट्
ii) लृट्
iii) लङ्
iv) लोट्

ख) 'गच्छ' इत्यस्मिन् पदे पुरुषः अस्ति
i) प्रथमपुरुषः
ii) मध्यमपुरुषः
iii) उत्तमपुरुषः
iv) तृतीयपुरुषः



2018-3-8 19:52

www.vidyarthiplus.com



ग) 'गच्छामि' इत्यस्मिन् पदे वचनम् अस्ति

i) एकवचनम्
ii) द्विवचनम्
iii) बहुवचनम्
iv) अन्यवचनम्

घ) 'लभन्ते' इत्यस्मिन् पदे धातुः अस्ति

i) लव्
ii) लभ्
iii) लाभ
iv) लभन्

ङ) 'विद्या माता इव रक्षति' इत्यस्मिन् वाक्ये अव्ययम् अस्ति

i) विद्या
ii) माता
iii) इव
iv) रक्षति

4. उचित विकल्पं चित्वा लिखत : [1×5=5]

क) 'शक्तिमान्' इत्यस्मिन् पदे प्रत्ययः अस्ति

i) क्तवतु
ii) शानच्
iii) मतुप्
iv) शतृ

ख) 'कथितः' इत्यस्मिन् पदे प्रत्ययः अस्ति

i) क्त
ii) क्तवतु
iii) क्त्वा
iv) ल्यप्

ग) 'अनीयर्' प्रत्ययस्य उदाहरणम् अस्ति

i) स्मरणीयम्
ii) पठितव्यं
iii) दत्वा
iv) गतः

घ) 'अजा' इत्यस्मिन् पदे प्रत्ययः अस्ति

i) टाप्
ii) जाप्
iii) आप्
iv) शाप

ङ) परोपकारः __________ प्राणैः कण्ठगतैरपि।

i) हर्त्तव्यः
ii) गन्तव्यः
iii) कर्त्तव्यः
iv) कृतः



(P.T.O.)

2018-3-8 19:52

www.vidyarthiplus.com

www.vidyarthiplus.com



5. प्रदत्तैः शब्दैः रिक्तस्थानपूर्तिं कुरुत (कोऽपि पञ्च) : [1×5=5]

(सप्तहीता, यशः, तनयं, आत्मा, लघुत्वं, वारिधिरैः)

i) महर्षिः ____________ शरीरेण अमरः अस्ति।

ii) प्रक्रीडितो ____________ सुरेन्द्रः।

iii) येन यज्ञस्तायते ____________।

iv) पितरौ अपि एतादृशं ____________ नाभिनन्दतः।

v) सर्वेषु शरीरेषु ____________ एक एव।

vi) परसदननिविष्टः को ____________ न याति।

6. अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत : [2×3=6]

i) मे मनः किम् अस्तु ?

ii) वृक्षस्य आधारभूता का ?

iii) संस्कृतभाषा कस्य पोषणं करोति ?

iv) रघुः कस्मात् हेमराशिं लब्धवान् ?

v) छत्रसालः कस्य शिष्यः आसीत् ?

7. अधोलिखितेषु द्वयोः शब्दयोः शब्दरूपाणि निर्देशानुसारं लिखत : [2]

i) 'पितृ' तृतीया विभक्तिः एकवचनं

ii) 'राजन्' षष्ठी विभक्तिः द्विवचनं

iii) 'अस्मद्' सप्तमी विभक्तिः बहुवचनं

8. 'मह्यम्' अथवा 'मम' इति पदस्य विभक्तिं वचनम् च लिखत। [2]

9. अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत : [5×2=10]

क) मध्यप्रदेशस्यनगरीयं पौराणिकी ऐतिहासिकी च वर्तते। विदिशा पूर्वस्मिन् काले 'भेलसा' इति नाम्ना सुविख्याता आसीत्। एतस्य कारणं सूर्यदेवतायाः मन्दिरस्य 'भेल्लस्वामिनः' इति लोकख्यातिरेव। पुरा विदिशानगरी समुन्नतमेकं वाणिज्यिकं केन्द्रमासीत्। योगदर्शनस्य प्रणेता व्याकरणमहाभाष्यस्य कर्ता महर्षिः पतञ्जलिः सम्राट् अशोकोऽपि विदिशया सह सम्बद्धौ आस्ताम्।

i) मध्यप्रदेशस्य का नगरी पौराणिकी ऐतिहासिकी च वर्तते ?

ii) पूर्वस्मिन् काले विदिशा नगर्याः किं नाम आसीत् ?

iii) पुरा विदिशा नगरी कीदृशं केन्द्रम् आसीत् ?

iv) 'भेल्लस्वामिनः' इति कस्य मन्दिरस्य लोकख्यातिः ?

v) पतञ्जलिः कः आसीत् ?

2018-3-8 19:53

www.vidyarthiplus.com

www.vidyarthiplus.com



ख) भगीरथः दुःखितः अभवत्। सः पुनः तपः कृतवान्। शिवः तस्य पुरतः प्रत्यक्षः अभवत्। "हे ईश ! नदीं भूमौ विसृजतु" इति भगीरथः प्रार्थितवान्। तां प्रार्थनाम् अङ्गीकृत्य शिवः नद्याः जलं भूमौ विसृष्टवान्। भगीरथः नदीं भूमितः पातालं नीतवान्। पाताले प्रवहन्ती गङ्गा सगरपुत्राणां भस्मानि स्पृष्टवती। सगरपुत्राः स्वर्गलोकं गतवन्तः।

i) भगीरथः नदीं भूमितः कुत्र नीतवान् ?

ii) भगीरथः किं प्रार्थितवान् ?

iii) भगीरथस्य पुरतः कः प्रत्यक्षः अभवत् ?

iv) के स्वर्गलोकं गतवन्तः ?

v) कः पुनः तपः कृतवान् ?

ग) गङ्गातीरे मार्कण्डेयः नाम कश्चन् मुनिः वसति स्म। तस्य गुरुकुले बहवः शिष्याः आसन्। वासुदेवः तस्य प्रियशिष्यः। तस्य द्वादशवर्षात्मकम् अध्ययनं यदा समाप्तं तदा गुरुः तम् आहूय अवदत् - "शिष्य ! अधुना भवान् सर्वविद्यापारङ्गतः अस्ति। अतः इतः परं स्वग्रामं गन्तुम् अर्हति भवान्। गमनात् पूर्वं भवता द्वारकापुरस्य देवराजस्य गृहं दृष्ट्वा आगन्तव्यम्।"

i) मार्कण्डेयः नाम ऋषिः कुत्र वसति स्म ?

ii) वासुदेवः कस्य प्रियशिष्यः आसीत् ?

iii) बहवः शिष्याः कुत्र आसन् ?

iv) सर्वविद्यापारङ्गतः कः अभवत् ?

v) गुरुः शिष्यम् आहूय कदा अवदत् ?

10. अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत : [5×2=10]

क) गङ्गा पापं शशी तापं दैन्यं कल्पतरुस्तथा।
पापं तापं च दैन्यंच घ्नन्ति सन्तो महाशयाः॥

i) का पापं हन्ति ?

ii) शशी किं करोति ?

iii) कल्पतरुः किं हन्ति ?

iv) पापं तापं दैन्यं च के घ्नन्ति ?

v) 'हन्ति' इत्यस्मिन् पदे किं वचनम् अस्ति ?



(P.T.O.)

2018-3-8 19:53

www.vidyarthiplus.com

www.vidyarthiplus.com



ख) दरिद्रता धीरतया विराजते, कुवस्त्रता शुभ्रतया विराजते।
कदन्नता चोष्णतया विराजते, कुरूपता शीलतया विराजते।।
i) दरिद्रता कया विराजते ?
ii) कुवस्त्रता कया विराजते ?
iii) कुरूपता कया विराजते ?
iv) उष्णतया का विराजते ?
v) 'विराजते' इत्यस्मिन् पदे लकारः अस्ति

ग) युवान एष वः परीक्षणस्य काल आगतः,
हिमालयस्य रक्षणे समुद्यताः स्थ सर्वतः।
अयं सखा पुरातनोऽस्य भारतस्य विद्यते,
स्वकर्मणि प्रवर्तितुं कदापि नैव खिद्यते॥
i) युवान एष वः कस्य कालः आगतः ?
ii) कस्य रक्षणे समुद्यताः स्थ सर्वतः ?
iii) अयं पुरातनो अस्य भारतस्य कः विद्यते ?
iv) कस्मिन् प्रवर्तितुं कदापि नैव खिद्यते ?
v) 'नैव' इत्यस्य पदस्य सन्धिविच्छेदं कुरुत।

11. युग्ममेलनं कुरुत (कोऽपि चत्वारः) : [4]

| अ | ब |
|---|---|
| i) वरुणदेवः | i) वृद्धः |
| ii) द्विजश्रेष्ठः | ii) खगोलशास्त्रं |
| iii) दीर्घसूत्री | iii) प्रसिद्धाः |
| iv) कालगणना | iv) न स्यात् |
| v) महापुरुषाः | v) वृष्टिं वर्षति |

12. शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत (कोऽपि चत्वारः) : [4]
i) महर्षेः ख्यातिः सर्वत्र व्याप्ता अस्ति।
ii) घटोत्कचः जनन्या आज्ञप्तः।
iii) एकः शून्य गृहम् अनुप्रविशेत्।
iv) छिन्नः चन्दनतरुः गन्धं जहाति।
v) कौत्सः गुरुदक्षिणार्थी आसीत्।



2018-3-8 19:53

www.vidyarthiplus.com

www.vidyarthiplus.com



13. अधोलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकपदेन लिखत : [4]

i) कदा दधि न भुञ्जीत् ?

ii) का रूपं नाशयिष्यति ?

iii) घनोपगूढं किम् ?

iv) महाभारतस्य प्रणयनं केन कृतम् ?

v) भारतीयैकतायाः साधकं किम् ?

14. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्य पुस्तकस्य सुभाषितद्वयं लिखत। [4]

15. स्वप्राचार्यस्य कृते छात्रवृत्यर्थम् एकं प्रार्थनापत्रं संस्कृतभाषायां लिखत। [4]

अथवा

स्वमित्राय एकं शुभकामनापत्रं संस्कृतभाषायां लिखत।

16. अधोलिखितेषु 'पञ्च' अशुद्धकारकवाक्यानां शुद्धिः करणीया : [5]

i) श्रीगणेशं नमः।

ii) छात्राः क्रीडाक्षेत्रे क्रीडति।

iii) पिता पुत्रस्य सह गच्छति।

iv) कृष्णं नवनीतं रोचते।

v) भवान् किं करोषि।

vi) कृषकाः ग्रामे गच्छन्ति।

17. अधोलिखित वाक्यानां कथानुसारेण क्रमसंयोजनं कुरुत : [5]

i) उष्ट्रः यूथाद् भ्रष्टोऽभवत्।

ii) सिंहेन उष्ट्रः मारितः।

iii) तेन प्रचुरा उष्ट्राः करभाश्च सम्मिलिताः।

iv) वने प्रसववेदनया पीड्यमानाम् उष्ट्रीम् अपश्यत्।

v) रथकारः दारिद्र्योपहतः चिन्तितवान्।



(P.T.O.)

2018-3-8 19:53

www.vidyarthiplus.com

www.vidyarthiplus.com

D – 106

18. अधोलिखितम् अपठितं गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत : [5]

संस्कृतभाषा अस्माकं देशस्य प्राचीनता भाषा अस्ति। प्राचीनकाले सर्वे एव भारतीयाः संस्कृतभाषया एव व्यवहारं कुर्वन्ति स्म। कालान्तरे विविधाः प्रान्तीयाः भाषाः प्रचलिताः अभवन् किन्तु संस्कृतस्य महत्वम् अद्यापि अक्षुण्णं वर्तते। सर्वे प्राचीनग्रन्थाः चत्वारो वेदाश्च संस्कृतभाषायामेव सन्ति। संस्कृतभाषा भारतराष्ट्रस्य एकतायाः आधारः अस्ति।

i) उपर्युक्त गद्यांशस्य उचितं शीर्षकं लिखत।

ii) अस्माकं देशस्य प्राचीनतमा भाषा का ?

iii) सर्वे वेदग्रन्थाः कस्यां भाषायां सन्ति ?

iv) भारत राष्ट्रस्य एकतायाः आधारः कः ?

v) कस्य महत्वम् अद्यापि अक्षुण्णं वर्तते ?

19. अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत : [10]

i) छात्रजीवनम्

ii) महाकविः कालिदासः

iii) उत्सवः (दीपावलिः)

iv) सदाचारः

2018-3-8 19:53

www.vidyarthiplus.com